पिष्ट्वा तल्लेपनाद्धन्ति भक्षणाच्च भगन्दरम् ।
रसः कालाग्निरुद्रोऽयं गुञ्जैकं मधुलिड्भवेत् ॥”
कालाग्निरुद्रो रसः ॥ * ॥
इति सारदीपिकायां भगन्दरचिकित्साध्यायः ॥
अपि च । गारुड़े १८८ अध्याये ।
“गुग्गुलुं त्रिफलायुक्तं पीत्वा नश्येत् भगन्दरः ॥”
(अस्य सकारणलक्षणचिकित्सितं यथा,—
क्रिम्यस्थि सूच्यादिक्षणनव्यवाय-
प्रवाहनान्युत्कटकाश्वपृष्ठैः ।
गुदस्य पाके पिड़का भृशार्त्तिः
पक्वप्रभिन्ना तु भगन्दरः स्यात् ॥
विरेचनञ्चैषणपाटनञ्च
विशुद्धमार्गस्य च तैलदाहः ।
स्यात् क्षारसूत्रेण सुपाचितेन
छिन्नस्य चास्य व्रणवच्चिकित्सा ॥”
इति चरके चिकित्सास्थाने सप्तदशेऽध्याये ॥)

भगभक्षकः, पुं, (भगं योनिस्तामुपाश्रित्य भक्षयति जीविकां निर्व्वाहयतीति । भक्ष + ण्वुल् ।) कुण्डाशी । इति महाभारते दानधर्म्मः ॥ कोट्ना इति भाषा ॥ तस्यान्नभक्षणनिषेधो यथा,—
“यो बान्धवैः परित्यक्तः साधुभिर्ब्राह्मणैरपि ।
कुण्डाशी यस्य तस्यान्नं भुक्त्वा चान्द्रायणञ्चरेत् ॥”
इति मार्कण्डेयपुराणे सदाचाराध्यायः ॥

भगवती, स्त्री, (भगः ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षस्णां भग इतीङ्गना ॥” इत्युक्तलक्षणम् षडैश्वर्य्यमस्त्यस्येति । भग + “तदस्यास्त्यस्मिन्निति मतुप् ।” ५ । २ । ९४ । इति मतुप् । मस्य वः ।
“भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्ति विवक्षायां भवन्ति मतुबादयः ॥”
इति काशिकोक्तेर्नित्ययोगेऽत्र मतुप्प्रत्ययः । ततः स्त्रियां ङीप् ।) पूज्या । गौरी । इति मेदिनी । ते, २१४ ॥ (सा च प्रकृतिरूपिणी महामाया देवी । यथा, मार्कण्डेये । ८१ । ४२ ।
“ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ॥”)
सरस्वती । यथाह पौराणिकाः ।
“सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥”
गङ्गा । यथा, शङ्कराचार्य्यकृतगङ्गास्तोत्रे ।
“भगवति ! भवलीलामौलिमाले तवाम्भः-
कणमणुपरिमाणं प्राणिनो ये स्पृशन्ति ॥”
तस्याः स्वरूपं यथा,—
“यथा नित्यो हि भगवान् नित्या भगवती तथा ।
स्वमायया तिरोभूता तत्रेशे प्राकृते लये ॥
आब्रह्मस्तम्बपर्य्यन्तं सर्व्वं मिथ्यैव कृत्रिमम् ।
दुर्गा सत्यस्वरूपा सा प्रकृतिर्भगवान् यथा ॥
सिद्ध्यैश्वर्य्यादिकं सर्व्वं यस्यामस्ति युगे युगे ।
सिद्ध्यादिके भगो ज्ञेयस्तेन भगवती स्मृता ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः ॥
अपि च ।
“सेव्यते या सुरैः सर्व्वैस्ताश्चैव भजते यतः ।
धातुर्भजेति सेवायां भगवत्येव सा स्मृता ॥”
इति देवीपुराणे ४५ अध्यायः ॥
तस्याः प्रतिमाविशेषस्य पूजने फलविशेषो यथा,
ब्रह्मोवाच ।
“शृणु तस्याः सुराध्यक्ष ! आराधनविधिं परम् ।
यथा सा तोषिता पूर्व्वं शङ्कराद्यैः फलेप्सुभिः ॥
कर्म्मयज्ञेन देवेश ! तथा त्वमपि पूजय ।
शम्भुः पूजयते देवीं मन्त्रशक्तिमयीं शुभाम् ॥
अक्षमालाकरो नित्यं तेनासौ विबुधाधिपः ।
अहं शैलमयीं देवीं यजामि सुरसत्तम ! ॥
तेन ब्रह्मत्वमेवेदं मया प्राप्तं सुदुर्लभम् ।
इन्द्रनीलमयीं देवीं विष्णुरर्च्चयते सदा ॥
विष्णुत्वं प्राप्तवांस्तेन अद्भुतैकं सनातनम् ।
देवीं हेममयीं कान्तां धनदोऽर्च्चयते सदा ॥
तेनासौ धनदो देवो धनेशत्वमवाप्तवान् ।
विश्वेदेवा महात्मानो रौप्यां देवीं मनोहराम् ।
यजन्ति विधिवद्भक्त्या तेन विश्वत्वमाप्नुयुः ॥
वायुः पूजयते भक्त्या देवीं पित्तलसम्भवाम् ।
वायुत्वं तेन तत् प्राप्तमनौपम्यं गुणावहम् ॥
वसवः कांसिकां देवीं पूजयन्ति विधानतः ।
प्राप्नुवन्तो महात्मानो वसुत्वं सुमहोदयम् ॥
अश्विनौ पार्थिवीं देवीं पूजयन्तौ विधानतः ।
तेन तावश्विनौ देवौ दिव्यदेहं गतावुभौ ॥
स्फाटिकां शोभनां देवीं वरुणोऽर्च्चयते सदा ।
वरुणत्वं हि संप्राप्तं तेन ऋद्ध्या समन्वितम् ॥
देवीमन्नमयीं पुण्यामग्निर्यजति भावितः ।
अग्नित्वं प्राप्तवांस्तेन तेजोरूपसमन्वितम् ॥
ताम्रां देवीं सदाकालं भक्त्या देवो दिवाकरः ।
अर्च्चते तत्र संप्राप्तं तेन सूर्य्यत्वमुत्तमम् ॥
मुक्ताशैलमयीं देवीं सोमः पूजयते सदा ।
तेन सोमोऽपि संप्राप्तः सोमत्वं सततोज्ज्वलम् ॥
प्रवालकमयीं देवीं यजन्ति पन्नगोत्तमाः ।
तेन नागास्तु भोगाढ्याः प्रयान्त्येते परं पदम् ॥
कृष्णायसमयीं देवीं पूजयन्त्यसुरोत्तमाः ।
राक्षसाश्च महात्मानस्तेन वेऽमितविक्रमाः ॥
त्रपुसीसमयीं देवीं पिशाचाः पूजयन्ति ताम् ।
तेन ऋद्धिबलोपेताः प्रयान्ति परमं पदम् ॥
त्रैलोहिकां सदा देवीं यजन्ते गुह्यकादयः ।
तेन भोगबलोपेताः प्रयान्तीश्वरमन्दिरम् ॥
वज्रलौहमयीं देवीं यजन्ते मातरः सदा ।
मातृत्वं प्राप्य ताः सर्व्वाः प्रयान्ति परमं पदम् ॥
एवं देवाः सगन्धर्व्वाः पिशाचोरगराक्षसाः ।
पूजयन्ति सदाकालं चर्च्चिकां सुरनायिकाम् ॥
तथा त्वमपि देवेन्द्र ! यदीच्छसि परां गतिम् ।
शिवां मणिमयीं पूज्य लभसे मनसेप्सितान् ॥
कामान् सुरवराध्यक्ष ! कामिकैः पूजितैः सदा ।
ददाति सर्व्वलोकानां चिन्तामणिर्यथा शिवा ॥”
इत्याद्ये देव्यवतारे द्रव्यविधिपूजामाहात्म्ये ३८ अध्यायः ॥ तस्यै गृहदानस्य फलं यथा,—
ईश्वर उवाच ।
“देव्या गृहन्तु यः शुक्रकारापयति शोभनम् ।
सर्व्वोपकरणैर्युक्तं सकपाटार्गलान्वितम् ॥
तस्मिन् घण्टा ध्वजं छत्रं वितानं दर्पणानि च ।
दत्त्वा सुरजवंशादि नित्यं सङ्गीतकानि च ॥
देवीशास्त्रार्थवेत्तारं पूजनं भवने शुभम् ।
एवं प्रवर्त्तते यस्तु तस्य पुण्यफलं शृणु ॥
दशपूर्व्वापरांस्तात ! आत्मनश्चैकविंशतिम् ।
उद्धृत्य च कुलं पापाद्ब्रह्मलोके महीयते ॥
गच्छते भगवती यत्र परा परमपूजिता ।
तत्र कल्पान्तरं यावद्भुक्त्वा भोगान् मनोरमान् ॥
पुनः कालादिहायातः पृथिव्यामेकराड्भवेत् ।
सभृत्यवाहनोपेतः शान्तः पुरपरिच्छदः ॥
पुनर्देव्या द्विजातीनां तद्भक्तानां प्रियो भवेत् ॥
कन्यासम्पूजको नित्यं देवीशास्त्रार्थपारगः ।
लभते परसद्भावं तदन्ते शिवतां व्रजेत् ॥
देव्या गृहन्तु यः शुक्र ! सम्मार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः ॥
तदागच्छेच्छिवालोकं सर्व्वकालफलप्रदम् ।
देव्या गृहन्तु यः शुक्र ! गोमयेनानुलेपयेत् ॥
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति ॥”
इत्याद्ये देव्यवतारे ४२ अध्यायः ॥

भगवद्भक्तः, पुं, (भगवतो भगवत्या वा भक्तः ।) श्रीकृष्णभक्तियुक्तः । अथ भगवद्भक्तानां लक्षणानि । सामान्यतः लैङ्गे ।
“विष्णुरेव हि यस्यैष देवता वैष्णवः स्मृतः ॥”
अत्र विशेषः ।
“व्रतकर्म्मशुभस्नानभोगजन्मादिमत्स्वपि ।
शैवेष्वपि च कृष्णस्य भक्ताः सन्ति तथा तथा ॥”
तत्र व्रतिषु मध्ये भगवद्भक्तिहेतुव्रतपरता भगवद्भक्तलक्षणम् । तथा च स्कान्दे श्रीमार्कण्डेयभगीरथसंवादे ।
“दशमीशेषसंयुक्तं दिनं वैष्णवदुर्लभम् ।
त्युपास्यते महीपाल ! ते वै भागवता नराः ॥
प्राणात्यये न चाश्नन्ति दिनं प्राप्य हरेर्नराः ।
कुर्व्वन्ति जागरं रात्रौ सदा भागवता हि ते ॥
उपोष्य द्वादशीं शुद्धां रात्रौ जागरणान्विताम् ।
अत्यान्तु साधयेद्यस्तु स वै भागवतो नरः ॥
भक्तिर्न विच्युता येषां न च्युतानि व्रतानि च ।
सुप्रियः श्रीपतिर्येषां ते सुभागवता नराः ॥”
कर्म्मिषु भगवदर्पणादिना तदाज्ञानुज्ञया वा भक्तिहेतुसदाचारपरता तत्रैव ।
“धर्म्मार्थं जीवितं येषां सन्तानार्थञ्च मैथुनम् ।
पचनं विप्रमुख्यार्थं ज्ञेयास्ते वैष्णवा नराः ॥
अध्वगन्तु पथि श्रान्तं कालेऽत्र गृहमागतम् ।
योऽतिथिं पूजयेद्भक्त्या वैष्णवः स न संशयः ॥
सदाचाररताः शिष्टाः सर्व्वभूतानुकम्पकाः ।
मुच्यवस्त्यक्तरागा ये सदा भागवता हि ते ॥”